(727) " तीकृ गतौ " (I-भ्वादिः-106. सक. सेट्. आत्म.)

तीककः-किका, तीककः-किका, तितीकिषकः-षिका, तेतीककः-किका ; तीकिता-त्री, तीकयिता-त्री, तितीकिषिता-त्री, तेतीकिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकचीभृधातुवत् (530) ज्ञेयानि ।

(728) " तीर कर्मसमाप्तौ " (X-चुरादिः-1912. सक. सेट्. उभ.)

अदन्तः ।

तीरकः-रिका, तितीरयिषकः-षिका ; तीरयिता-त्री, तितीरयिषिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककीटधातुवत् (194) ज्ञेयानि । तीरम्, दक्षिणतीरम्, दक्षिणतारम्, उत्तरतीरम्, उत्तरतारम्, 'दिक्छब्देभ्यः तीरस्य तारभावो वा वक्तव्यः' (वा. 6-3-109) इति वचनेन तीरस्य तारभावः विकल्पेन भवति । ल्युटि-[A]तीरणम् ।

(729) " तीव स्थौल्ये " (I-भ्वादिः-565. अक. सेट्. पर.)

तीवकः-विका, तीवकः-विका, तितीविषकः-षिका, तेतीवकः-विका ; तीविता-त्री, तीवयिता-त्री, तितीविषिता-त्री, तेतीविता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि कीलधातुवत् (195) बोध्यानि । क्विपि—[1]सुत्यूः-सुतीवौ-सुतीवः इति रूपाणि । तीवः[B] ।

(730) " तु गतिवृद्धिहिंसासु "

(II-अदादिः-1034-A. सक. अनि. पर.) [अ]

'तु इति सौत्रो धातुः गतिवृद्धिहिंसासु' इति सि. कौमुदी । " अत्र व्याख्यानमेव शरणम् " इति बालमनोरमा ।

1. क्विपि 'च्छ्वोः शूडनुनासिके च' (6-4-19) इति वकारस्योठ् । यणादेशे सोः रुत्वविसर्गौ ।

A. 'दुष्पारदुश्चरिततीरणकृत्यथेशो नो चक्षमे पुटयितुं तमकत्रितोष्मा ॥' धा. का. 3.59.

B. 'अपीवितां नाप्यतिमीवितां श्रितं तनुं सुतीवोरुमनीवमध्यमाम् ॥' धा. का. 1.72.

[अ] अदादौ 'रु शब्दे' इत्यत्र माधवधातुवृत्तौ एवं दृश्यते—" 'तुरुस्तुशम्यमः—' (7-3-95) इत्यत्र वृत्तौ—'तुः इति सौत्रो धातुः' इति । अत्र न्यासे—'वृध्यर्थ इति एके । हिंसार्थ इति अपरे ; यस्य च लुग्विकरणत्वं स्मर्यते ।' इति । वर्धमानश्च—'तु इति वृद्धिहिंसयोरदादौ स्मर्यते' इति । हरदत्तस्तु—वृद्ध्यर्थत्वमभिधाय, 'गत्यर्थ इति एके । हिंसार्थ इत्यपरे ।' इति । 'त्रिष्वपि' इति बोधिन्यासे ।" इति ।